# Question Paper Code : 7271

M.A. (Semester-I) Examination, 2017

SANSKRIT

[ Third Paper ]

( भारतीय दर्शनम् )

Time : Three Hours] [Maximum Marks : 70

(For Back Paper/Improvement/Exempted Candidate (s) the Maximum marks will be 100)

**निर्देशः पञ्च प्रश्नाः** समाधेयाः। **प्रथमः प्रश्नोऽनिवार्यः।** प्रतिवर्गमेकः प्रश्नोऽवश्यं समाधेयः।

1. लघूत्तराणि देयानि : [3×10=30]

(क) न प्रकृतिर्न विकृतिः पुरुषः।

(ख) त्रिविधं प्रमाणमिष्टं।

(ग) सावयवं परतन्त्रं व्यक्तं विपरीतम व्यक्तम् ।

(घ) पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ।

(ङ) अध्यवसायो बुद्धिर्धर्मो ।



http://www.lucknowstudy.com

(च) किं पुनर्लिङ्ग कञ्च तस्य परामर्शः ।

(छ) किं पुनः प्रत्यक्षम् ।

(ज) असमवायि कारणम् ।

(झ) शास्त्रस्य प्रकृत्तिः कीतधा।

(ञ) अनुबन्ध चतुष्टयम् ।

**प्रथमो वर्गः**

2. व्याख्या विधोया : [10]

(क) तदा कारणभेदोऽप्यस्ति। घटो हि घटं प्रति न कारणमेकस्यैव पौर्वापर्याभावात्। न हि स एव तमेव प्रति पूर्वभावो पश्चाद्भावी चेति। स्वगुणान् प्रति तु पूर्व भावित्वात् भवति गुणानां समवायिकारणम्।

नन्वेवं सति प्रथमे क्षणे घटोऽचाक्षुषः स्याद, अरूपिद्रव्यत्वाद् वायुवत। तदेव हि द्रव्यं चाक्षुषं यन्महत्वे सात्युद् भूतरूपवत्।

(ख) प्रथमे क्षेणे घटो यदि चक्षुपा न गृह्यते का नो हानिः। नहि सगुणोत्पत्तिपक्षेऽपि निमेषावसरे घटो गृह्यते। तेन व्यस्तिथतमेतन्निर्गुण एवं प्रथमं घट उत्पद्यते। द्वितीया दिक्षणेंषु चक्षुषा गृह्यते। न च प्रथमे क्षणे गुणाश्रयत्वाभावाद् द्रव्यत्वापत्तिः। समवायिकारणं द्रव्यमिति द्रव्य लक्षण योगात्। योग्यता गुणाश्रयत्वाच्च । योग्यता च गुणानामत्यन्ताभावाभावः।



3. व्याख्या विधेयाः [10]

(क) तच्चानुमानं द्विविधं। स्वार्थ परार्थ चेति। स्वार्थ स्वप्रतिपत्ति हेतुः। तथाहि स्वयमेव महानसादौ विशिष्टेन प्रत्यक्षेण धूमाग्न्यो व्याप्तिं गृहीत्वा पर्वत समीपं गतस्तदगते चाग्नौ सन्दिहानः । पर्वतवर्तिनीमविच्छिन्न मूलाम भ्रंलिहां धूमलेखान् पश्यन् धूमदर्शनाच्चोद्बुद्धसंस्कारो व्याप्तिं स्मरति। यत्र धूमस्तत्राग्निरिति ततोऽत्रापि धूमोऽस्तीति प्रतिपद्यते।

(ख) आप्तवाक्यं शब्दः। आप्तस्तु यथाभूतस्यार्थस्योपदेष्टा पुरुषः। वाक्यं त्वाकाङ्क्षायोग्यतासन्निधिमतां पदानां समूहः। अतएव 'गोरेञ्चः पुरुषो हस्ती' इति पदानि न वास्यम्। परस्पराकाङ्क्षाविरहात्। 'वह्निना सिञ्चेदि' ति न वाक्यम्। योग्यता विरहात्। न हि अग्निसेकयोः परस्परान्वय योग्यतास्ति। तथाहि अग्निनेति तृतीया सेकरूपं कार्य प्रति करणत्वमग्नेः प्रतिपादितम्। न चाग्निःसेके करणी भवितुं योग्यः। तेन कार्यकारण भावलक्षण सम्बन्धेऽग्नि सेकयोरयोग्यत्वादग्निना सिञ्चेदि ति न वाक्यम्।

**द्वितीयो वर्गः**

4. व्याख्या करणीयाः [10]

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ।।



http://www.lucknowstudy.com

5. व्याख्या करणीयाः [10]

हेतुमदनित्यमव्यापि सक्रियमनेकमश्रितं लिङ्गम् ।
सावयवं परतन्त्रं वक्तं विपरीतम व्यक्तम् ।।

## तृतीयो वर्गः

6. सांख्यसम्मतं 'पुरुष बहुत्वं' विवेचनीयम् । [10]

7. प्रत्यक्ष प्रमाणोपयोगी षोढा सन्निकर्ष विवेचनीयः। [10]

## चतुर्थो वर्गः

8. सांख्य सम्मतं व्यक्ताव्यक्त स्वरूप निरूप्यताम् । [10]

9. भारतीय दर्शनानां विभाजनं विधीयताम् । [10]

----- x -----



http://www.lucknowstudy.com